# १४. अपापापुरी[संक्षिप्त]कल्पः§ ।

**सिद्धार्थो**त्त्या वनान्ते **खरक**सुभिषजाभ्यञ्जनद्रोणिभाजः, शल्ये निष्कि(ष्कृ?)ष्यमाणे श्रुतियुगविवरात्तीव्रपीडार्दितस्य ।
यस्या अभ्यर्णभागेऽन्तिमजिनमुकुटस्योद्यदाश्चर्यमुच्चै-श्चञ्चत्चीत्काररावस्फुटित[1]गिरिदरी दृश्यतेऽद्यापि पूरः ॥ १ ॥
चक्रे तीर्थप्रवृत्तिं चरमजिनपतिर्यत्र वैशाखशुक्लै-कादश्यामेत्य रात्रौ वनमनु **महसेना**ह्वयं **जृम्भिका**तः ।
सच्छात्रास्तत्र चैकादशगणपतयो दीक्षिता **गौतमा**द्या, जग्रन्थु**र्द्वादशाङ्गीं** भवजलधितरीं ते निषद्यात्रयेण ॥ २ ॥
यस्यां श्री**वर्धमानो** व्यहमनशनकृद्देशनावृष्टिमन्त्यां, कृत्वा श्री**हस्तिपाला**भिधधरणिभुजोऽधिष्ठितः शुल्कशालाम् ।
स्वातावूर्जस्य दर्शे शिवमसमसुखश्रीनिशान्तं निशान्ते, प्रापत्**पापा**स्तपापान् विरचयतु जनान् सा पुरीणां धुरीणा ॥ ३ ॥
नागा अद्यापि यस्यां प्रतिकृतिनिलया दर्शयन्ति प्रभावं, निस्तैले नीरपूर्णे ज्वलति गृहमणिः कौशिके यन्निशासु ।
भूयिष्ठाश्चर्यभूमिश्चरमजिनवरस्तूपरम्यस्वरूपा, साऽ**पापा** मध्यमादिर्भवतु वरपुरी भूतये यात्रिकेभ्यः ॥ ४ ॥

**॥ इति श्रीअपापाकल्पः ॥**

॥ ग्रं० १०, अ० २१ ॥

---

1 C चउद्दिसं । १-१ एतदङ्कान्तर्गता पंक्तिः पतिता C आदर्शे । 2 A °सेणेय° । § A आदर्शे नोपलभ्यते एष कल्पः ।

वि० क० ४